# Shri Sharadadevi Stotram

# શ્રીશારદાદેવીસ્તોત્રમ્

## Document Information

Text title : Shri Sharadadevi Stotram

File name : shAradAdevIstotram2.itx

Category : deities_misc, gurudev, rAmakRiShNa, stotra

Location : doc_deities_misc

Author : Kalipada Bandyopadhyaya

Proofread by : Aruna Narayanan

Description-comments : rAmakRiShNastotramAlA, stavanAnjali

Acknowledge-Permission: Ramakrishna Shivananda Mission, Varasat

Latest update : June 12, 2023

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 12, 2023

*sanskritdocuments.org*

# શ્રીશારદાદેવીસ્તોત્રમ્

યા દેવી મર્ત્યદેહેઽમરગણ-વિરલ-જ્યોતિષા દીપ્યમાના
    યસ્યાઃ પુણ્ય પ્રભાવૈરગણિત-મનુજા દર્શિતા મુક્તિમાર્ગમ્ ।
યસ્યાઃ પીયૂષવાણી નિખિલ-તનુભૃતાં સર્વસન્તાપ-હન્ત્રી
    શ્રી માઁ-રૂપેણ નૃણાં નિયત-હિતકરીં શારદાં તાં નમામિ ॥ ૧॥

પત્યુઃ સ્થાનં વ્રજન્તી સ્વજન-પરિહૃતા પ્રાન્તરે ભીમદસ્યૂ
    "કન્યાઽહં શારદા તે ત્વમસિ મમ પિતા રક્ષણીયા ત્વયાઽહમ્ ।"
ઇત્યુક્ત્વા દસ્યુચિત્તં કુલિશ-સુકઠિનં કોમલં યા ચકાર
    શ્રી માઁ-રૂપેણ મહ્યાં ધૃતતનુમભયાં શારદાં તાં નમામિ ॥ ૨॥

ત્યક્ત્વા ભોગસ્ય માર્ગં પતિગત-હૃદયા તદ્વ્રતે ચૈકનિષ્ઠા
    પૂર્ણં કર્તું વ્રતં તદ્ વિગલિત-ચિકૂરા માતૃભાવાશ્રિતા યા ।
પત્યુઃ પૂજામગૃહ્ણાજ્જગતિ નિરુપમાં ષોડશી સિદ્ધિદાત્રી
    શ્રી માઁ-ખ્યાં વિશ્વવન્દ્યાં ગિરિવર-તનયાં શારદાં તાં નમામિ ॥ ૩॥

ભક્તાનાં માતૃરૂપાં સતતમભયદાં સર્વકલ્યાણકામાં
    પત્યૂરુગ્ણસ્ય સેવામનલસ-મનસા કુર્વતીં ક્લાન્તિહીનામ્ ।
આતિથ્યે મુક્તહસ્તાં સુનિપુણ-ગૃહિણીમબ્ધિ જાતા-સ્વરૂપાં
    શ્રી માઁ-ખ્યાં વિશ્વરૂપામભિમત-વરદાં શારદામર્ચયામિ ॥ ૪॥

લબ્ધ્વા માતૃત્વ-સમ્પદ્-બહુસુકૃતિફલં યોષિતઃ પૂર્ણકામા-
    સ્તસ્માત્ સન્તાનચિન્તા મનસિ સમુદિતા સા તુ તત્રૈવ લીના ।
સઙ્ખ્યાતીતાન્ સુપુત્રાન્ નિજ-તનુજ-નિભાન્ પ્રાપ્ય યાસીત્કૃતાર્થા
    કલ્યાણીં શુદ્ધસત્ત્વાં જનગણજનની શારદાં તાં નમામિ ॥ ૫॥

પ્રણત-હૃદયપદ્મ-ન્યસ્તપાદાબ્જયુગ્મા
    મધુરવચનગર્ભાં બિભ્રતી કણ્ઠવીણામ્ ।
રુચિરવિમલકાન્તિર્જ્ઞાનભક્તિપ્રદાત્રી
    નિખિલભુવન પૂજ્યા શારદા શારદૈવ ॥ ૬॥

જયતુ જયતુ દેવી ધ્યાનગમ્ભીરમૂર્તિ-
    ર્જયતુ જયતુ દેવી સાધકાભીષ્ટદાત્રી ।
જયતુ જયતુ દેવી રામકૃષ્ણસ્ય શક્તિ-
    ર્જયતુ જયતુ દેવી શારદા વિશ્વધાત્રી ॥ ૭॥

વૈકુણ્ઠે વિષ્ણુ પાર્શ્વે વિહરતિ કમલા વિશ્વકલ્યાણદાત્રી
    કૈલાશે શમ્ભુવાસે વિહરતિ ગિરિજા લોકરક્ષા-વિધાત્રી ।
જાહ્નવ્યાં પુણ્યતીર્થે મણિમય-ભવને કાલિકા-પાદપદ્મે
    રાજતે ધ્યાનમગ્નૌ મમ હૃદયનિધૌ શારદા-રામકૃષ્ણૌ ॥ ૮॥

ઇતિ શ્રીકાલીપદબન્ધોપાધ્યાયવિદ્યાવિનોદેનવિરચિતં
    “શ્રીશ્રીશારદાદેવીસ્તોત્રમ્” સમ્પૂર્ણમ્ ।

Proofread by Aruna Narayanan

*Shri Sharadadevi Stotram*

pdf was typeset on June 12, 2023

Please send corrections to *sanskrit@cheerful.com*